२१

गृत्समद (आङ्गिरसः शौनहोत्रः पश्चाद्) भार्गवः शौनकः।इन्द्रः। जगती, ६ त्रिष्टुप्

**विश्वजिते धनजिते स्वर्जिते सत्राजिते नृजित उर्वराजिते।**

**अश्वजिते गोजिते अब्जिते भरेन्द्राय सोमं यजताय हर्यतम्॥ २.०२१.०१**

विश्वजिते- सर्वजिते। धनजिते- सम्पज्जिते। स्वर्जिते- स्वर्गजिते। सत्राजिते- सततजिते। नृजिते- मनुष्यजिते। उर्वराजिते- भूजिते। अश्वजिते- प्राणजिते। गोजिते- रश्मिजिते। अब्जिते- शक्तिजिते। इन्द्राय- जयशीलाय परमेश्वराय। यजताय- पूज्याय। हर्यतं- कमनीयम्। सोमं- रसम्। भर- वह ॥१॥

**अभिभुवेऽभिभङ्गाय वन्वतेऽषाळ्हाय सहमानाय वेधसे।**

**तुविग्रये वह्नये दुष्टरीतवे सत्रासाहे नम इन्द्राय वोचत॥ २.०२१.०२**

अभिभुवे- व्याप्ताय। अभिभङ्गाय- वृत्रभञ्जकाय। वन्वते- सम्भक्रे। वन सम्भक्तौ। अषाळ्हाय- असह्याय। सहमानाय- सहनशीलाय। वेधसे- मेधाविने। तुविग्रये- प्रभूतरवाय। गॄ शब्दे। वह्नये- निर्वाहकाय। दुष्टरीतये- दुस्तराय। सत्रासाहे- सदा सहमानाय। इन्द्राय- परमेश्वराय। नमः। वोचत- ब्रूत ॥२॥

**सत्रासाहो जनभक्षो जनंसहश्च्यवनो युध्मो अनु जोषमुक्षितः।**

**वृतंचयः सहुरिर्विक्ष्वारित इन्द्रस्य वोचं प्र कृतानि वीर्या॥ २.०२१.०३**

सत्रासहः- सदा सहनशीलः। जनभक्षः- जनसम्भजनीयः। जनंसहः- जनानां सहनशीलः। च्यवनः- वृत्रच्यावयिता। युध्मः- योद्धा। जोषं- प्रीतिम्। अनु। उक्षितः- रससिक्तः। वृतंचयः- वृतस्य संचेता। सहुरिः- अभिभविता। विक्षु- प्रजासु। आरितः- प्रापितः। इन्द्रस्य- तादृशस्य ईशनाधिदैवतस्य। वीर्या- वीर्याणि। कृतानि- रचितानि। प्र वोचं- प्रकर्षेण वदामि ॥३॥

Dr. Ranganji
WEBOLIM

**अनानुदो वृषभो दोधतो वधो गम्भीर ऋष्वो असमष्टकाव्यः।**

**रध्रचोदः श्नथनो वीळितस्पृथुरिन्द्रः सुयज्ञ उषसः स्वर्जनत्॥ २.०२१.०४**

अनानुदः- असमानदायकः। अनु पश्चाद्दाता अनुदः स नास्ति यस्य स अनानुदः। वृषभः- वर्षकः। दोधतः- हिंसकस्य। वधः- हिंसकः। गम्भीरः- अगाधः। ऋष्वः- दर्शनीयो महान्। असमष्टकाव्यः- इतरैरव्याप्तसूक्ष्मदर्शनयुक्तः। रध्रचोदः- संसिद्धिचोदकः। राध संसिद्धौ। श्नथनः- शत्रुनाशकः। वीळितः- दृढः। पृथुः- व्याप्तः। इन्द्रः- ईशनकर्ता। सुयज्ञः- शोभनसङ्गतिकारकः। शोभनदायकः। उषसः- विद्यायाः। स्वः- आत्मसूर्यम्। जनत्- जनयति चित्ताकाशे प्रकटयतीति भावः॥४॥

**यज्ञेन गातुमप्तुरो विविद्रिरे धियो हिन्वाना उशिजो मनीषिणः।**

**अभिस्वरा निषदा गा अवस्यव इन्द्रे हिन्वाना द्रविणान्याशत॥ २.०२१.०५**

धियः। हिन्वानाः- प्रेरयन्तः। उशिजः- कामयमानाः। मनिषिणः- मेधाविनः। यज्ञेन- पूजया दानेन सङ्गतिकरणेन। अप्तुरः- जीवोदकचोदकादिन्द्रादीशनाधिदैवतात्। गातुं- मार्गम्। विविद्रिरे- लब्धवन्तः। अभिस्वरा- मन्त्रेण। निषदा- उपसदेन। गाः- चिद्रश्मीन्। हिन्वानाः- प्रेरयन्तः। अवस्यवः- रक्षाकामाः। इन्द्रे- परमेश्वरे। द्रविणानि- सम्पदः। आशत- प्राप्नुवन्॥५॥

**इन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे।**

**पोषं रयीणामरिष्टिं तनूनां स्वाद्मानं वाचः सुदिनत्वमह्नाम्॥ २.०२१.०६**

इन्द्र- परमेश्वर। श्रेष्ठानि- उत्तमाः। द्रविणानि- सम्पदः। धेहि- धारय। अस्मे- अस्माकम्। दक्षस्य चित्तिं- समर्थप्रज्ञम्। धेहि। रयीणां- सम्पदाम्। पोषं- पुष्टिम्। तनूनां- देहानाम्। अरिष्टिं- अहिंसाम्। वाचः। स्वाद्मानं- स्वादुताम्। अह्नां- दिनानाम्। सुदिनत्व- शोभनत्वं धेहि॥६॥

Dr Ranganji
WEBOLIM